# सांख्यदर्शनपरिचयः

डॉ. जि. नरसिंहुलु
सहायकाचार्यः,
अद्वैतवेदान्तविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः
अगरतला, त्रिपुरा

## दर्शनम् –

- दृश्यते यथार्थतत्त्वमनेनेति दर्शनम् ।
- दृश्यते साक्षात् क्रियते परमात्मादिसंज्ञासंज्ञितः परमपुरुषार्थः येन तद् दर्शनम् ।
- सांख्यमते तु दृश्यते भेदेन उपलभ्यते सत्त्वं पुरुषश्च येन तद् दर्शनम् ।

वेदप्रामाण्यमङ्गीकृत्य प्रवृत्तानि आस्तिकदर्शनानि षट् । यथा-

| दर्शनम् | प्रवर्तकः |
| --- | --- |
| न्यायदर्शनम् | गौतममहर्षिः |
| वैशेषिकदर्शनम् | कणादमुनिः |
| सांख्यदर्शनम् | कपिलमुनिः |
| योगदर्शनम् | पतञ्जलिमहर्षिः |
| मीमांसादर्शनम् | जैमिनिमहर्षिः |
| वेदान्तदर्शनम् | बादरायणमहर्षिः |

# सांख्यशब्दस्य निर्वचनम्

- सम्यक् ख्यातिः संख्या, यथार्थज्ञानमित्यर्थः । प्रकृतिपुरुषयोः विवेकः ख्यातिः ज्ञानमित्यर्थः। केचन सत्त्वपुरुषान्यथाख्यातिः, व्यक्ताव्यक्तविज्ञानम् इत्यपि वदन्ति ।
- सांख्यदर्शनस्थः संख्याशब्दः ज्ञानर्थकः गणननार्थकश्च भवतीति शास्त्रस्यास्य अनुशीलनेन ज्ञातुं शक्नुमः। महाभारते नैकत्र सांख्यदर्शनप्रस्तावः समवलोक्यते । तद्यथा-


संख्या प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।
तत्त्वानि च चतुर्विंशद् तेन सांख्या प्रकीर्तिताः ।।

(महाभा. शान्ति.12.24.38)

दोषाणां च गुणानां च प्रमाणं प्रविभागतः ।
कंचिदर्थमभिप्रेत्य सा संख्येत्युपधार्यते ।।

(महाभा. शान्ति.316.2 )

# सांख्याचार्यपरम्परा




एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्॥
शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन च चैतदार्यादिभिः।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥

# सांख्यदर्शनस्य मौलिकग्रन्था:

| कर्ता | ग्रन्थः |
|---|---|
| कपिलमुनिः | साङ्ख्यप्रवचनसूत्राणि, तत्त्वसमाससूत्राणि |
| ईश्वरकृष्णः | साङ्ख्यकारिका |

# व्याख्याकारा:

| ग्रन्थः | व्याख्याकारः |
|---|---|
| सांख्यप्रवचनभाष्यम् | विज्ञानभिक्षुः |
| सांख्यतत्त्वकौमुदी | वाचस्पतिमिश्रः |
| माठरवृत्तिः | माठरः |

# सांख्यदर्शनस्य वैशिष्ट्यम्

ज्ञानञ्च लोके यदिहास्ति किञ्चित् सांख्यगतं तच्च महन्महात्मन् ।


(शान्तिपर्व – 301.109)


पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत्।

जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः।

(शान्तिपर्व – 301.109)


तत्कारणं सांख्ययोगाधिगम्यम् । (श्वेताश्वेतरोपनिषद् – 3.13)


दुःखत्रयम्
आध्यात्मिकम्
आधिभौतिकम्
आधिदैविकम्
शारीरम्
मानसम्




दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्तः।

तद्विपरीतः श्रेयान् व्याक्ताव्यक्तज्ञविज्ञानात्।।


पञ्चविंशतितत्त्वानि
अचेतनतत्त्वानि
चेतनतत्त्वम्
व्यक्तानि
अव्यक्तानि
पुरुषः (1)
(न प्रकृतिः न विकृतिः
केवलप्रकृतिः (1)
प्रकृतिविकृतयः (7)
विकृतयः (16)
मूलप्रकृतिः
(प्रधानम्)
महत्
एकादशेन्द्रियाणि
अहंकारः
पञ्चमहाभूतानि
पञ्चतन्मात्राणि
मूलप्रकृतिरविकृतिः महदाद्याप्रकृतिविकृतेः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।

# साङ्ख्यदर्शने प्रमाणानि

**प्रमाणानि**

- दृष्टम् (प्रत्यक्षम्)
- अनुमानम्
  - पूर्ववत्
  - शेषवत्
  - सामान्यतो दृष्टम्
- आप्तवचनम् (शब्दः)

दृष्टमानुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि। ।
प्रतिविषयाध्यवसो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु।।

# गुणस्वरूपम्

- सत्त्वम्
  - प्रीत्यात्मकः
  - प्रकाशात्मकः
- रजः
  - अप्रीत्यात्मकः
  - प्रवृत्यात्मकः
- तमः
  - विषादात्मकः
  - नियमात्मकः

# गुणव्यापारः

- अन्योन्भिभवः
- अन्योन्याश्रयः
- अन्योन्यजननम्
- अन्योन्यमिथुनवित्तिः

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्ति निमार्थाः।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।।
सत्त्वं लघु प्रकाशमिष्टकमुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः।।

## पुरुषस्वरूपम्

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृत्वभावश्च॥

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः॥

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥

## प्रकृतिपुरुषयोः संयोगकारणम्

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥


# सत्कार्यवादः

असदकरणात् उपादानग्रहणात् सर्वसम्भवाभावात् ।

शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।

- असदकरणात्
- उपादानग्रहणात्
- सर्वसम्भवाभावात्
- शक्तस्य शक्यकरणात्
- कारणभावात्

# सृष्टिव्यवस्था




प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥

# बन्धमोक्षौ

रूपैः सप्तभिरेव तु बध्नात्याच्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।।

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्याद् विशुद्धं केवलमुत्पद्यते ज्ञानम्।।

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः।।

रङ्गस्थ इत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य।।